DEPARTMENT OF SANSKRIT

Academic Year- 2019-2020

SEM 5th HONOURS

PAPER – CC12

UNIT- II

**TROPIC** –SANSKRIT GRAMMAR (**সমাস**)

- **তত্পুরুষসমাসস্য সূত্রমেকং আলোচ্যতাম্।**

সম্–পূর্বকাত্ অস্ ধাতোঃ ঘঞ্ প্রত্যয়েন সমাসশব্দস্য নিষ্পত্তির্ভবতি। সমাসশব্দস্যার্থঃ একীকরণাত্মিকঃ সংশ্লেষঃ। সমস্যতে অনেকপদমিতি সমাসশব্দস্য ব্যুত্পত্তিঃ ভবতি। দ্বয়োর্বহুনাং বা পদানাং বা একপদীভবনং সমাসঃ ইত্যুচ্যতে। পাণিনিনা সমাসস্য সংজ্ঞা ন কৃতা, ব্যুত্পত্ত্যা এব অস্যার্থঃ প্রতীয়তে।

**ন নির্ধারণে (**2/2/10**) -**

**দী.–** নির্ধারণে যা ষষ্ঠী সা ন সমস্যতে। নৃণাং দ্বিজঃ শ্রেষ্ঠঃ।

**সূত্রব্যাখ্যা** –

পাণিনীয়ং বিধিসূত্রমিদম্। অনেন সূত্রেণ সমাসস্য নিষেধঃ ভবতি। অতঃ নিষেধাত্মকং বিধিসূত্রম্। **ষষ্ঠী** ইতি সূত্রম্, **তত্পুরুষ** ইতি সূত্রম্, **সুবামন্ত্রিতে পরাঙ্গবত্স্বরে** ইতি সূত্রাত্ সুপ্ ইতি পদম্, **সহ সুপা** ইতি সূত্রম্, **প্রাক্কডারাত্ সমাসঃ** ইতি সূত্রাত্ সমাসঃ ইতি পদং চ অত্র অনুবর্ততে। **ষষ্ঠী** ইত্যনেন ষষ্ঠ্যন্তং সমর্থেন সহ সমস্যতে। **ষষ্ঠী** ইতি পদং

তদন্তস্য বোধকো ভবতি। ষষ্ঠ্যন্তস্য নিষেধায় **ন** ইতি পাঠো গ্রহণীয়ো । **যতশ্চ নির্ধারণম্(**2/3/41**)** ইত্যনেন সূত্রেণ বিহিতা যা ষষ্ঠী তত্রৈব সমাসো ন করণীয়ঃ **ন নির্ধারণে (**2/2/10**)** ইত্যনেন সূত্রেণ। যথা নৃণাং শ্রেষ্ঠঃ। অত্র **নৃণাম্** **'**যতশ্চ নির্ধারণম্' ইতি সূত্রেণ ষষ্ঠী ভবতি। অতঃ অনেন সূত্রেণ তস্য নিষেধঃ ভবতি, সমাসো ন জাতঃ। যদি অত্র সমাসঃ নিষেধঃ ন ভবতি তর্হি অত্র সমাসো ভবিষ্যতি, তদা নৃণাং শ্রেষ্ঠঃ ইত্যুক্তে নৃশ্রেষ্ঠঃ ইতি অশুদ্ধং রূপং ভবিতুমর্হতি। অতঃ শুদ্ধরূপং নিমিত্তম্ সূত্রমিদং প্রযোজনম্।

প্রতিপদবিধানেন যা ষষ্ঠী তেন সহ সমাসঃ ন ভবতি। পদং পদং প্রতিপদম্। প্রতিপদং বিধানং যস্যাঃ সা প্রতিপদবিধানা। অস্য সূত্রস্য ব্যাখ্যানাবসরে দীক্ষিতেন বার্তিকমিদমুদ্ভূতম্- **প্রতিপদবিধানা ষষ্ঠী ন সমস্যতে।** যথা সর্পিষো জ্ঞানমিতি। অত্র সর্পিষজ্ঞানম্ এবংরূপেণ সমাসঃ ন ভবতি। অত্র অনেন বার্তিকেন সমাসঃ ন ভবতি।